## तदस्मिन्नन्नं प्राये सञ्ज्ञायाम् । (८२/१८८२)

तत् इति प्रथमासमर्थादस्मिन् इति सप्तम्यर्थे कन् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं अन्नं चेत् प्रायविषयं तद् भवति । प्रायो बाहुल्यम् । सञ्ज्ञाग्रहणं तदन्तोपाधिः । [1]गुडापूपाः प्रायेणान्नम् अस्यां पौर्णमास्यां [2]गुडापूपिका । [3]तिलापूपिका पौर्णमासी ।

[५७३] वटकेभ्य इनिर्वक्तव्यः । (म. भा. २. ३८८)

वटकिनी [4]पौर्णमासी ॥

## कुल्माषादञ् । (८३/१८८३)

कुल्माषशब्दात् अञ् प्रत्ययो भवति, 'तदस्मिन्नन्नं प्राये सञ्ज्ञायाम्' (५.२.८२/१८८२) इत्येतस्मिन्नर्थे[5] । ञकारो [6]वृद्धिस्वरार्थः । [7]कुल्माषाः प्रायेण अन्नमस्याम् [8]कौल्माषी पौर्णमासी ॥

## श्रोत्रियंश्छन्दोऽधीते । (८४/१८८४)

श्रोत्रियन् इति निपात्यते छन्दोऽधीते इत्येतस्मिन्नर्थे[9] । नकारः स्वरार्थः । श्रोत्रियो ब्राह्मणः । 'श्रोत्रियं–श्छन्दोऽधीते' इति वाक्यार्थे पदवचनम् (म. भा. २. ३८९), छन्दसो वा श्रोत्रभावः, तदधीते इति घन् च प्रत्ययः (म. भा. २. ३८९) । कथं छन्दोऽधीते छान्दसः[10] ? वाग्रहणमनुवर्तते 'तावतिथं ग्रहणमिति लुग्वा' (५. २. ७७/१८७७) इत्यतः ॥

## श्राद्धमनेन भुक्तमिनिठनौ । (८५/१८८५)

श्राद्धम् इति प्रकृतिः । अनेन इति प्रत्ययार्थः । भुक्तम् इति प्रकृतिविशेषणम् । श्राद्धशब्दाद् भुक्तो–पाधिकाद् [11]अनेन इत्यस्मिन्नर्थे [13]इनिठनौ प्रत्ययौ भवतः । श्राद्धशब्दः कर्मनामधेयं तत्साधनद्रव्ये [13]वर्तित्वा प्रत्यय-मुत्पादयति । श्राद्धं भुक्तमनेन श्राद्धी, श्राद्धिकः । इनिठनोः समानकालग्रहणं कर्तव्यम् (म. भा. २. ३८९), अद्य भुक्ते श्राद्धे श्वः श्राद्धिकः इति मा भूत् ॥

## पूर्वादिनिः । (८६/१८८६)

अनेन इति प्रत्ययार्थः कर्ताऽनुवर्तते । न च क्रियामन्तरेण कर्ता सम्भवति इति यां काञ्चित् क्रियाम[14]ध्याहृत्य प्रत्ययो [15]विधेयः । [16]पूर्वात् अनेन इत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । पूर्वं गतमनेन पीतं भुक्तं वा पूर्वी, पूर्विणौ, पूर्विणः ॥

---

1. इडापूर्वाः ह. 2, इडापूपिका: ह. 3. कृसरिका त्रिपुटिका क. ड, तृत्सरिका त्रिपुटिका ह. 4. पौर्णमासी नास्ति ब. 5. विषये फ. ह. 6. वृद्ध्यर्थः फ, स्वरार्थः वृद्ध्यर्थश्च क. ह. 7. कुल्मासाः फ. 8. पौर्णमास्याम् इत्याधिकम् फ, कौल्मासी फ. ह. 9. विषये ह. 10. ब्राह्मणः इत्यधिकम् फ. 11. प्रथमा–समर्थात् इत्यधिकम् ब. फ, तृतीयासमर्थेन इत्यधिकम् क. 12. इनिठञौ क. 13. वर्तित्वात् ह. 14. अध्यास्य क. 15. अभिधेयः ह. 16. पूर्वशब्दात् ब. क. ड. फ. ह.